इकः [1]कित्त्वं गुणो मा भूद् | दीर्घारम्भात् | कृते भवेत् ।
[2]अनर्थकं तु | ह्रस्वार्थं | दीर्घाणां तु प्रसज्यते ॥ १ ॥

सामर्थ्याद्धि पुनर्भाव्यमृदित्त्वं दीर्घसंश्रयम् ।
दीर्घाणां नाकृते दीर्घे | णिलोपस्तु प्रयोजनम् ॥ २ ॥ (म. भा. १. १९७)

## हलन्ताच्च । (१०/२६१३)

इकः सन् झल् [3]कित् इति वर्तते । समीपवचनो[4]ऽन्तशब्दः । हल् चासावन्तश्च हलन्तः । [5]इगन्तादिक्समीपाद् हलः परः सन् [6]झलादिः किद् भवति । बिभित्सति । बुभुत्सते । इकः इत्येव । [7]यियक्षते । झल् इत्येव । [8]विवर्तिषते । दम्भेर्हल्ग्रहणस्य जाति[9]वाचकत्वात् सिद्धम् (म. भा. १.१९७), [10]धीप्सति, धिप्सति (६.४.२४/४१५) ॥

## लिङ्सिचावात्मनेपदेषु । (११/२३००)

हलन्तादिको [11]झल् कित् इति वर्तते । सन् इति निवृत्तम् । इगन्ताद् [12]इक्समीपाद्धलः परौ [13]झलादी लिङ्सिचौ [14]आत्मनेपदेषु परतः कितौ भवतः । [15]भित्सीष्ट, भुत्सीष्ट । [16]सिचि खल्वपि––अभित्त, अबुद्ध । इकः इत्येव । [17]यक्षीष्ट, अयष्ट । [18]सम्प्रसारणं (६.१.१५/२४०९) [19]हि स्यात् । आत्मनेपदेषु इति किम् ? अस्राक्षीत् । अद्राक्षीत् । 'सृजिदृशोर्झल्यमकिति' (६.१.५८/२४०५) इत्यमागमो न स्यात् । [20]हलन्तात् इत्येव । चेषीष्ट, अचेष्ट । गुणो न स्यात् । झल् इत्येव । वर्तिषीष्ट, [21]अवर्तिष्ट । गुणो न स्यात् । [22]लिङ्सिचौ इति किम् ? द्वेष्टा । द्वेक्ष्यति ॥

## उश्च । (१२/२३६८)

ऋवर्णान्ताद्धातोः परौ लिङ्सिचौ आत्मनेपदेषु झलादी कितौ भवतः । [23]कृषीष्ट । हृषीष्ट । [24]सिचः खल्वपि- अकृत । अहृत । झल् इत्येव । वरिषीष्ट । अवरिष्ट । '[25]वृतो वा' (७.२.३८/२३९१) [26]अवरीष्ट ॥

## वा गमः । (१३/२७००)

लिङ्सिचावात्मनेपदेषु इति वर्तते । गमेर्धातोः परौ[27] लिङ्सिचौ आत्मनेपदेषु झलादी वा कितौ भवतः । [28]संगसीष्ट, संगसीष्ट । [29]सिचः खल्वपि––समगंस्त, समगत । [30]कित्त्वपक्षे अनुनासिकलोपो भवति [31]'अनुदात्तोपदेशवनतितनोत्यादीनाम् (६.४.३७/२४२८) इति ॥

---

1. कित्त्वाद्गुणो भवेत् ह. 2. अनर्थकं––प्रयोजनम् नास्ति ग. 3. कित् नास्ति फ, इति च वर्तते ह. 4. अन्तः शब्दः क. 5. इगन्तादिक्समीपगतात् क. 6. झलादिः सन् ह. फ. 7. इयक्षते ह. 8. विवर्धिषते क. ह. ग. 9. वाचित्वात् ह. 10. धीप्सति नास्ति क.ड. 11. झलिति वर्तते फ. ग. 12. इकः समीपगतात् क. 13. झलि ग, नास्ति ह. 14. आत्मने ब, आत्मनेपदेषु परेषु क. 15. भित्सीष्टा ग, भुत्सीष्ट नास्ति ब. 16. सिचः अ. क. फ. ह. ड. 17. पक्षीष्ट । अपष्ट ब, अवर्तिषीष्ट ह, विवक्षति ड. 18. संप्रसारणं––द्वेक्ष्यति नास्ति ह, कित्त्वं फ, कित्त्वे ग. 19. हि नास्ति फ. ग. 20. हलन्तात्–– स्यात् नास्ति फ. 21. अवर्तिष्ट नास्ति फ. 22. लिङ्सिचौ––द्वेक्ष्यति नास्ति ड. 23. संगसीष्ट ग. 24. सिच् ब. क. ड. 25. वृतो नास्ति अ. क. ड. ब. फ. 26. ससूत्रमुदाहरणमिदं नास्ति ह. 27. यौ इत्यधिकम् फ. 28. संगंसीष्ट नास्ति ड. २9. वाक्यमिदं नास्ति ब, सिच् क. 30. सित्त्वपक्षे ग. 31. सूत्रमिदं नास्ति ह.